# ॥ नाट्यशास्त्रम् अध्याय १७ काकुस्वरव्यञ्जनः ॥

.. Natya Shastra Chapter 17 ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : nATyashAstram.h adhyAya 17 kAkusvaravyanjanaH
File name : natya17.itx
Category : natyashastra
Location : doc_z_misc_major_works
Author : Sage Bharata
Language : Sanskrit
Subject : philosophy/hinduism/culture/Dance/Drama
Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com
Proofread by : Sowmya Krishnapur krsowmya at yahoo.com
Latest update : July 16, 2010
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ नाट्यशास्त्रम् अध्याय १७ काकुस्वरव्यञ्जनः ॥

॥ श्रीरस्तु ॥

भरतमुनिप्रणीतं नाट्यशास्त्रम्

अथ सप्तदशोऽध्यायः ।

एवं तु संस्कृतं पाठ्यं मया प्रोक्तं द्विजोत्तमाः ।
प्राकृतस्यापि पाठ्यस्य सम्प्रवक्ष्यामि लक्षणम् ॥ १॥

एतदेव विपर्यस्तं संस्कारगुणवर्जितम् ।
विज्ञेयं प्राकृतं पाठ्यं नानावस्थान्तरात्मकम् ॥ २॥

त्रिविधं तच्च विज्ञेयं नाट्ययोगे समासतः ।
समानशब्दं विभ्रष्टं देशीगतमथापि च ॥ ३॥

कमलामलरेणुतरङ्गलोलसलिलादिवाक्यसम्पन्नम् ।
प्राकृतबन्धेष्वेवं संस्कृतमपि योगमुपयाति ॥ ४॥

ये वर्णाः संयोगात् स्वरवर्णान्यत्वं न्यूनतां चापि ।
गच्छन्ति पदन्यस्तास्ते विभ्रष्टा इति ज्ञेयाः ॥ ५॥

ये वर्णा वर्णगता व्यञ्जनयुक्ताश्च ये स्वरा नियताः ।
तानपरस्परवृत्ते प्राकृतयुक्त्या प्रवक्ष्यामि ॥ ६॥

यथा -
एओआरपराणिअ अं आरपरं अ पाअए णत्थि ।
बसआरमज्झिमाइ अ कच वग्गतवाणिहणाइं ॥ ७॥

वच्चन्ति कगतदयवा लोपं अत्थं च से वहंति सरा ।
खधथधभा उण हत्तं उवेंति अत्थं अ मुंचंता ॥ ८॥

उप्परहुत्तरआरो हेटाहुत्तो अ पाअए णत्थि ।
मोत्तूण भद्रचोद्रह पद्रह्लदचन्द्रजाई स ॥ ९॥

खधथधभाण हआरो मुहमेहकहावहूपह्लएसु ।
कगतदयवाण णिच्चं वीयम्मि ठिओ सरो होई ॥ १०॥

छ इति षकारो नित्यं बोद्धव्यः षटपदादियोगेषु ।
किल शब्दान्त्यो रेफो भवति तथा खु त्ति खलुशब्दः ॥ ११॥

ड इति च भवति टकारो भटकटककुटीतटाद्येषु ।
सत्वं च भवति शषयोः सर्वत्र तथा हि स स आदेशः ॥ १२॥

अष्टस्पश्च दकारो भवत्यनादौ तकार इतराद्यः ।
बडवातडागतुल्यो भवति डकारोऽपि च ककारः ॥ १३॥

वर्धनगते च भावे धकारवर्णोऽपि ढत्वमुपयाति ।
सर्वत्र च प्रयोगे भवति नकारोऽपि च णकारः ॥ १४॥

आपानम् आवानं भवति पकारेन वत्वयुक्तेन ।
अयथातथादिकेषु तु भकारवर्णो व्रजीत हत्वम् ॥ १५॥

परुषं फरुसं विद्यात्पकारवर्णोऽपि फत्वमुपयाति ।
यस्तु मृतः सोऽपि मओ यश्च मृगः सोऽपि हि तथैव ॥ १६॥

ओकारत्वं गच्छेदौकारश्चौषधादिषु नियुक्तः ।
प्रचलाचिराचलादिषु भवति चकारोऽपि तु यकारः ॥ १७॥

अपरस्परनिष्पन्ना ह्येवं प्राकृतसमाश्रया वर्णाः ।
संयुक्तानां तु पुनर्वक्ष्ये परिवृत्तिसंयोगम् ॥ १८॥

श्चप्सत्सध्याः छ इति तथाभ्यह्यध्या
भवन्ति तु झकाराः ।
ष्टः ट्ठः स्तः स्थः ष्मौ म्हः
क्ष्णो ह्लः ष्णो ण्हः क्षः खकाररूपोऽपि ॥ १९॥

आश्चर्यं अच्छरियं निश्चयमिच्छन्ति णिच्छयं च यथा ।
वत्सं वच्छं च यथा अप्सरसं तद्वदच्छरअम् ॥ २०॥

उत्साहो उच्छाहो पथ्यं च पच्छं विज्ञेयम् ।
तुभ्यं तुज्झं मह्यं मज्झं विन्ध्यश्च भवति विंज्झोत्ति ॥ २१॥

दष्टो वट्ठोत्ति तहा हस्तोऽपि च भवति हत्थोत्ति ।
ग्रीष्मो गिम्होत्ति तथा श्लक्ष्णं सह्लं सदा तु विज्ञेयम् ॥ २२॥

उष्णं उह्लं यक्षो जक्खो पर्यङ्को भवति पल्लंकु ।
विपरीतं हमयोगे ब्रह्मादौ स्याद् बृहस्पतौ फत्वम् ॥ २३॥

यज्ञो भवति न जन्नो भीष्मो भिम्होत्ति विज्ञेयः ।
उपरिगतोऽधस्ताद्वा भवेत्ककारादिकस्तु यो वर्णः ॥ २४॥

स हि संयोगविहीनः शुद्धः कार्यः प्रयोगेऽस्मिन् ।
एवमेतत्तु विज्ञेयं प्राकृतं संस्कृतं तथा ॥ २५॥

अत ऊर्ध्वं प्रवक्ष्यामि देशभाषाविकल्पनम् ।
भाषा चतुर्विधा ज्ञेया दशरूपे प्रयोगतः ॥ २६॥

संस्कृतं प्राकृतं चैव यत्र पाठ्यं प्रयुज्यते ।
अतिभाषार्यभाषा च जातिभाषा तथैव च ॥ २७॥

तथा योन्यन्तरी चैव भाषा नाट्ये प्रकीर्तिता ।
अतिभाषा तु देवानामार्यभाषा तु भूभुजाम् ॥ २८॥

संस्कारपाठ्यसंयुक्ता सम्यङ् न्याय्यप्रतिष्ठिता ।
विविधा जातिभाषा च प्रयोगे समुदाहृता ॥ २९॥

म्लेच्छशब्दोपचारा च भारतं वर्षमाश्रिता ।
अथ योन्यन्तरी भाषा ग्राम्यारण्यपशूद्भवा ॥ ३०॥

नानाविहङ्गजा चैव नाट्यधर्मी प्रतिष्ठिता ॥ ३१॥

जातिभाषाश्रयं पाठ्यं द्विविधं समुदाहृतम् ।
प्राकृतं संस्कृतं चैव चातुर्वर्ण्यसमाश्रयम् ।
धीरोद्धते सललिते धीरोदात्ते तथैव च ॥ ३२॥

धीरप्रशान्ते च तथा पाठ्यं योज्यं तु संस्कृतम् ।
एषामेव तु सर्वेषां नायकानां प्रयोगतः ॥ ३३॥

कारणव्यपदेशेन प्राकृतं सम्प्रयोजयेत् ।
दारिद्र्याध्ययनाभावयदृच्छादिभिरेव च ॥ ३४॥

ऐश्वर्येण प्रमत्तानां दारिद्र्येण प्लुतात्मनाम् ।
अनधीतोत्तमानां च संस्कृतं न प्रयोजयेत् ॥ ३५॥

व्याजलिङ्गप्रविष्टानां श्रमणानां तपस्विनाम् ।
भिक्षुचक्रचराणां च प्राकृतं सम्प्रयोजयेत् ॥ ३६॥

भागवततापसोन्मत्तबालनीचग्रहोपसृष्टेषु ।
स्त्रीनीचजातिषु तथा नपुंसके प्राकृतं योज्यम् ॥ ३७॥

परिव्राण्मुनिशाक्येषु चोक्षेषु श्रोत्रियेषु च ।
शिष्टा ये चैव लिङ्गस्थाः संस्कृतं तेषु योजयेत् ॥ ३८॥

राज्ञाश्च गणिकायाश्च शिल्पकार्यास्तथैव च ।
कलावस्थान्तरकृतं योज्यं पाठ्यं तु संस्कृतम् ॥ ३९॥

सन्धिविग्रहसम्बन्धं तथा च प्राप्तवाग्गतिम् ।
ग्रहनक्षत्रचरितं खगानां रुतमेव च ॥ ४०॥

सर्वमेतत्तु विज्ञेयं काव्यबन्धे शुभाशुभम् ॥ ४१॥

क्रीडार्थं सर्वलोकस्य प्रयोगे च सुखाश्रयम् ।
कलाभ्यासाश्रयं चैव पाठ्यं वेश्यासु संस्कृतम् ॥ ४२॥

कलोपचारज्ञानार्थं क्रीडार्थं पार्थिवस्य च ।
निर्दिष्टं शिल्पकार्यास्तु नाटके संस्कृतं वचः ॥ ४३॥

आम्नायसिद्धं सर्वासां शुभमप्सरसां वचः ।
संसर्गाद्देवतानां च तद्धि लोकोऽनुवर्तते ॥ ४४॥

छन्दतः प्राकृतं पाठ्यं स्मृतमप्सरसां भुवि ।
मानुषाणां च कर्तव्यं कारणार्थव्यपेक्षया ॥ ४५॥

सर्वास्वेह हि शुद्धासु जातिषु द्विजसत्तमाः ।
शौरसेनीं समाश्रित्य भाषां काव्येषु योजयेत् ॥ ४६॥

अथवा छन्दतः कार्या देशभाषा प्रयोक्तृभिः ।
नानादेशसमुत्थं हि काव्यं भवति नाटके ॥ ४७॥

मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी ।
बाह्लीका दक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥ ४८॥

शकाराभीरचण्डालशवरद्रमिलोद्रजाः ।
हीना वनेचराणां च विभाषा नाटके स्मृता ॥ ४९॥

मागधी तु नरेन्द्राणामन्तःपुरसमाश्रया ।
चेटानां राजपुत्राणां श्रेष्ठिनां चार्धमागधी ॥ ५०॥

प्राच्या विदूषकादीनां धूर्तानामप्यवन्तिजा ।
नायिकानां सखीनां च शूरसेन्यविरोधिनी ॥ ५१॥

यौधनागरकादीनां दक्षिणात्याथ दीव्यताम् ।
बाह्लीकभाषोदीच्यानां खसानां च स्वदेशजा ॥ ५२॥

शकारघोषकादीनां तत्स्वभावश्च यो गणः ।
शकारभाषा योक्तव्या चाण्डाली पुल्कसादिषु ॥ ५३॥

अङ्गारकारकव्याधकाष्ठयन्त्रोपजीविनाम् ।
योज्या शकारभाषा तु किंचिद्वानौकसी तथा ॥ ५४॥

गजाश्वाजाविकोष्ट्रादिघोषस्थाननिवासिनाम् ।
आभीरोक्तिः शावरी वा द्रामिडी वनचारिषु ॥ ५५॥

सुरङ्गाखनकादीनां सन्धिकाराश्वरक्षताम् ।
व्यसने नायकानां चाप्यात्मरक्षासु मागधी ॥ ५६॥

न बर्बरकिरातान्ध्रद्रमिलाद्यासु जातिषु ।
नाट्यप्रयोगे कर्तव्यं काव्यं भाषासमाश्रितम् ॥ ५७॥

गङ्गासागरमध्ये तु ये देशाः सम्प्रकीर्तिताः ।
एकारबहुलां तेषु भाषां तज्ज्ञः प्रयोजयेत् ॥ ५८॥

विन्ध्यसागरमध्ये तु ये देशाः श्रुतिमागताः ।
नकारबहुलां तेषु भाषां तज्ज्ञः प्रयोजयेत् ॥ ५९॥

सुराष्ट्रावन्तिदेषेषु वेत्रवत्युत्तरेषु च ।
ये देशास्तेषु कुर्वीत चकारप्रायसंश्रयाम् ॥ ६०॥

हिमवत्सिन्धुसौवीरान्ये जनाः समुपाश्रिताः ।
उकारबहुलां तज्ज्ञस्तेषु भाषां प्रयोजयेत् ॥ ६१॥

चर्मण्वतीनदीतीरे ये चार्बुदसमाश्रिताः ।
तकारबहुलां नित्यं तेषु भाषां प्रयोजयेत् ॥ ६२॥

एवं भाषाविधानं तु कर्तव्यं नाटकाश्रयम् ।
अत्र नोक्तं मया यत्तु लोकाद् ग्राह्यं बुधैस्तु तत् ॥ ६३॥

एवं भाषाविधानं तु मया प्रोक्तं द्विजोत्तमाः ।
पुनर्वाक्यविधानं तु लौकिकं सन्निबोधत ॥ ६४॥

उत्तमैर्मध्यमैर्नीचैर्यैः संभाष्या यथा नराः ।
समानोत्कृष्टहीनाश्च नाटके तान्निबोधत ॥ ६५॥

देवानामपि ये देवा महात्मानो महर्षयः ।
भगवन्निति ते वाच्या यास्तेषां योषितस्तथा ॥ ६६॥

देवाश्च लिङ्गिनश्चैव नानाश्रुतधराश्च ये ।
भगवन्निति ये वाच्याः पुरुषैः स्त्रीभिरेव च ॥ ६७॥

आर्येति ब्राह्मणं ब्रूयान्महाराजेति पार्थिवम् ।
उपाध्यायेति चाचार्यं वृद्धं तातेति चैव हि ॥ ६८॥

नाम्ना राजेति वा वाच्या ब्राह्मणैस्तु नराधिपाः ।
तत्क्षाम्यं हि महीपालैर्यस्मात्पूज्या द्विजाः स्मृताः ॥ ६९॥

ब्राह्मणैः सचिवो वाच्यो ह्यमात्यः सचिवेति वा ।
शेषैरन्यैर्जनैर्वाच्यो हीनैरार्येति नित्यशः ॥ ७०॥

समैः सम्भाषणं कार्यं येन नाम्ना स संज्ञितः ।
हीनैः सपरिवारं तु नाम्ना सम्भाष्य उत्तमः ॥ ७१॥

नियोगाधिकृताश्चैव पुरुषा योषितस्तथा ।
कारुकाः शिल्पिनश्चैव सम्भाष्यास्ते तथैव हि ॥ ७२॥

मार्षो भावेति वक्तव्यः किञ्चिदूनस्तु मार्षकः ।
समानोऽथ वयस्येति हं ह्वो हण्डेति वाधमः ॥ ७३॥

आयुष्मन्निति वाच्यस्तु रथी सूतेन सर्वदा ।
तपस्वीति प्रशान्तस्तु साधो इति च शब्यते ॥ ७४॥

स्वामीति युवराजस्तु कुमारो भर्तृदारकः ।
सौम्य भद्रमुखेत्येवं हे पूर्वं चाधमं वदेत् ॥ ७५॥

यद्यस्य कर्म शिल्पं वा विद्या वा जातिरेव वा ।
स तेन नाम्ना भाष्यो हि नाटकादौ प्रयोक्तृभिः ॥ ७६॥

वत्स पुत्रक तातेति नाम्ना गोत्रेण वा पुनः ।
वाच्यः शिष्यः सुतो वापि पित्रा वा गुरुणापि वा ॥ ७७॥

सम्भाष्या शाक्यनिर्ग्रन्था भदन्तेति प्रयोक्तृभिः ।
आमन्त्रणैस्तु पाषण्डाः शेषाः स्वसमयाश्रितैः ॥ ७८॥

देवेति नृपतिर्वाच्यो भृत्यैः प्रकृतिभिस्तथा ।
भट्टेति सार्वभौमस्तु नित्यं परिजनेन हि ॥ ७९॥

राजन्नित्यृषिभिर्वाच्यो ह्यपत्यप्रत्ययेन वा ।
वयस्य राजन्निति वा भवेद्वाच्यो महीपतिः ॥ ८०॥

विदूषकेण राज्ञी च चेटी च भवतीत्यपि ।
नाम्ना वयस्येत्यपि वा राज्ञा वाच्यो विदूषकः ॥ ८१॥

सर्वस्त्रीभिः पतिर्वाच्य आर्यपुत्रेति यौवने ।
अन्यदा पुनरार्येति महाराजेति भूपतिः ॥ ८२॥

आर्येति पूर्वजो भ्राता वाच्यः पुत्र इवानुजः ।
योषिद्भिरथ काम्येति राजपुत्रेति योधनैः ॥ ८३॥

पुरुषाभाषणं ह्येव कार्यं नाट्ये प्रयोक्तृभिः ।
पुनः स्त्रीणां प्रवक्ष्यामि यथाभाष्यास्तु नाटके ॥ ८४॥

तपस्विन्यो देवताश्च वाच्या भगवतीति च ।
गुरुभार्या तु वक्तव्या स्थानीया भवतीति च ॥ ८५॥

गम्या भद्रेति वाच्या वै वृद्धाम्बेति च नाटके ।
राजपत्न्यस्तु सम्भाष्याः सर्वाः परिजनेन वै ॥ ८६॥

भट्टिनी स्वामिनी देवीत्येवं वै नाटके बुधैः ।
देवीति महिषी वाच्या राज्ञा परिजनेन वा ॥ ८७॥

भोगिन्यः परिशिष्टास्तु स्वामिन्य इति वा पुनः ।
कुमार्यश्चैव वक्तव्याः प्रेष्याभिर्भर्तृदारिकाः ॥ ८८॥

स्वसेति भगिनी वाच्या वत्सेति च यवीयसी ।
ब्राह्मण्यार्येति वक्तव्या लिङ्गस्था व्रतिनी च या ॥ ८९॥

पत्नी चार्येति सम्भाष्या पितृनाम्ना सुतस्य सा ।
समानाभिस्तथा सख्यो हलेति स्यात्परस्परम् ॥ ९०॥

प्रेष्या हञ्जेति वक्तव्या स्त्रियो या तूत्तमा भवेत् ।
अज्जुकेति च वक्तव्या वेश्या परिजनेन च ॥ ९१॥

अत्तेति गणिका माता वाच्या परिजनेन हि ।
प्रियेति भार्या शृङ्गारे वाच्या राज्ञेतरेण वा ॥ ९२॥

पुरोधः सार्थवाहानां भार्यास्त्वार्येति सर्वदा ।
तल्लिङ्गार्थानि नामानि कार्याणि कविभिः सदा ॥ ९३॥

औत्पत्तिकानि यानि स्युर्न प्रख्यातानि नाटके ।
ब्रह्मक्षत्रस्य नामानि गोत्रकर्मानुरूपतः ॥ ९४॥

काव्ये कार्याणि कविभिः शर्मवर्मकृतानि हि ।
दत्तप्रायाणि नामानि वणिजां सम्प्रयोजयेत् ॥ ९५॥

कापालिकास्तु घण्टान्तनामानः समुदाहृता ।
शौर्योदात्तानि नामानि तथा शूरेषु योजयेत् ॥ ९६॥

विजयार्थानि नामानि राजस्त्रीणां तु नित्यशः ।
दत्ता मित्रा सेनेति वेश्यानामानि योजयेत् ॥ ९७॥

नानाकुसुमनामानः प्रेष्याः कार्यास्तु नाटके ।
मङ्गलार्थानि नामानि चेटानामपि योजयेत् ॥ ९८॥

गम्भीरार्थानि नामानि ह्युत्तमानां प्रयोजयेत् ।
यस्मान्नामानुसदृशं कर्म तेषां भविष्यति ॥ ९९॥

जातिचेष्टानुरूपाणि शेषाणामपि कारयेत् ।
नामानि पुरुषाणां तु स्त्रीणां चोक्तानि तत्त्वतः ॥ १००॥

एवं नामविधानं तु कर्तव्यं कविभिः सदा ।
एवं भाषाविधानं तु ज्ञात्वा कर्माण्यशेषतः ॥ १०१॥

पाठ्यगुणानिदानीं वक्ष्यामः । तद्यथा सप्तस्वराः, त्रीणि स्थानानि, चत्वारो वर्णाः, द्विविधा काकुः, षडलङ्काराः,

षडङ्गानीति । एषामिदानीं लक्षणमभिव्याख्यास्यामः ।
तत्र सप्तस्वरा नाम -
षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाः त एते
रसेषूपपाद्याः ॥ १०२॥

यथा -
ततः पाठ्यं प्रयुञ्जीत षडलङ्कारसंयुतम् ।
हास्यशृङ्गारयोः कार्यौ स्वरौ मध्यमपञ्चमौ ॥ १०३॥

षड्जर्षभौ तथा चैव वीररौद्राद्भुतेष्वथ ।
गान्धारश्च निषादश्च कर्तव्यौ करुणे रसे ॥ १०४॥

धैवतश्चैव कर्तव्यो बीभत्से सभयानके ।
त्रीणि स्थानानि - उरः कण्ठः शिर इति । भवत्यपि च
शारीर्यामथ वीणायां त्रिभ्यः स्थानिभ्य एव तु ।
उरसः शिरसः कण्ठात्स्वरः काकुः प्रवर्तते ॥ १०५॥

आभाषणं च दूरस्थे शिरसा सम्प्रयोजयेत् ।
नातिदूरे च कण्ठेन ह्युरसा चैव पार्श्वतः ॥ १०६॥

उरसोदाहृतं वाक्यं शिरसा दीपयेद् बुधः ।
कण्ठेन शमनं कुर्यात्पाठ्ययोगेषु सर्वदा ॥ १०७॥

उदात्तश्चानुदात्तश्च स्वरितः कम्पितस्तथा ।
वर्णाश्चत्वार एव स्युः पाठ्ययोगे तपोधनाः ॥ १०८॥

तत्र हास्यशृङ्गारयोः स्वरितोदात्तैर्वर्णैः पाठ्यमुपपाद्यं,
वीररौद्राद्भुतेषूदात्तकम्पितैः
करुणबीभत्सभयानकेष्वनुदात्तस्वरितकम्पितैरिति । द्विविधा
काकुः साकांक्षा निराकांक्षा चेति वाक्यस्य
साकांक्षनिराकांक्षकत्वात् ॥ १०९॥

अनियुक्तार्थकं वाक्यं साकांक्षमिति संज्ञितम् ।
नियुक्तार्थं तु यद्वाक्यं निराकांक्षं तदुच्यते ॥ ११०॥

तत्र साकांक्षं नाम
तारादिमन्द्रान्तमनियुक्तार्थमनिर्यातितवर्णालङ्कारं
कण्ठोरःस्थानगतम् । निराकांक्षं नाम नियुक्तार्थं
निर्यातितवर्णालङ्कारं शिरःस्थानगतं मान्द्रादितारान्तमिति ।
अथ षडलङ्कारा नाम -

उच्चो दीप्तश्च मन्द्रश्च नीचो द्रुतविलम्बितौ ।
पाठ्यस्यैते ह्यलङ्कारा लक्षणं च निबोधत ॥ ११२॥

उच्चो नाम  शिरःस्थानगतस्तारस्वरः, स च
दूरस्थाभाषणविस्मयोत्तरोत्तरसंजल्पदूराह्वानत्रासनाबाधाद्येषु ।
दीप्तो नाम शिरःस्थानगतस्तारतरः, स
चाक्षेपकलहविवादामर्षक्रुष्टाधर्षणक्रोधशौर्यदर्पती-
क्ष्णरूक्षाभिधाननिर्भर्त्सनाक्रन्दितादिषु ।
मन्द्रो नाम उरःस्थानगतो निर्वेदग्लानिचिन्तौत्सुक्यदैन्यव्याधिक्रीडा-
गाढशस्त्रक्षतमूर्छामदगुह्यार्थवचनादिषु ।
नीचो नाम उरःस्थानगतो मन्द्रतरः, स च
स्वभावाभाषणव्याधिशमश्रमार्तत्रस्तपतितमूर्छितादिषु ।
द्रुतो नाम कण्ठगतः स च त्वरितः,
लल्लनमन्मनभयशीतज्वरत्रासात्यस्तात्ययिककार्यावेदनादिषु ।
विलम्बितो नाम कण्ठस्थानगतस्तनुमन्द्रः, स च
श्रृङ्गारकरुणवितर्कितविचारामर्षासूयिताव्यक्तार्थप्रवादलज्जा-
चिन्तातर्जनविस्मयदोषानुकीर्तनदीर्घरोगनिपीडनादिषु
अत्रानुवंश्या श्लोका भवन्ति ॥ ११३-११४॥

उत्तरोत्तरसंजल्पपरुषाक्षेपणेषु च ।
तीक्ष्णरूक्षाभिनयने आवेगे क्रन्दिते तथा ॥ ११५॥

परोक्षस्य समाह्वाने तर्जने त्रासने तथा ।
दूरस्थाभाषणे चैव तथा निर्भर्त्सनेषु च ॥ ११६॥

भावेष्वेतेषु नित्यं हि नानारससमाश्रया ।
उच्चा दीप्ता द्रुता चैव काकुः कार्या प्रयोक्तृभिः ॥ ११७॥

व्याधिते च ज्वरार्ते च भयार्ते शीतविप्लुते ।
नियमस्थे वितर्के च गाढशस्त्रक्षतेषु च ॥ ११८॥

गुह्यार्थवचने चैव चिन्तायां तपसि स्थिते ।
मन्द्रा नीचा च कर्तव्या काकुर्नाट्यप्रयोक्तृभिः ॥ ११९॥

लल्ले च मन्मने चैव भयार्ते शीतविप्लुते ।
मन्द्रा द्रुता च कर्तव्या काकुर्नाट्यप्रयोक्तृभिः ॥ १२०॥

दृष्टनष्टानुसरणे इष्टानिष्टश्रुते तथा ।
इष्टार्थख्यापने चैव चिन्ताध्याने तथैव च ॥ १२१॥

उन्मादेऽसूयिते चैव उपालम्भे तथैव हि ।
अव्यक्तार्थप्रवादे च कथायोगे तथैव च ॥ १२२॥

उत्तरोत्तरसंजल्पे कार्येऽतिशयसंयुते ।
विकृते व्याधिते क्रोधे दुःखे शोके तथैव च ॥ १२३॥

विस्मयामर्षयोश्चैव प्रहर्षे परिदेविते ।
विलम्बिता च दीप्ता च काकुर्मन्द्रा च वै भवेत् ॥ १२४॥

लघ्वक्षरप्रायकृते गुर्वक्षरकृते तथा ।
उच्चा दीप्ता च कर्तव्या काकुस्तत्र प्रयोक्तृभिः ॥ १२५॥

यानि सौम्यार्थयुक्तानि सुखभावकृतानि च ।
मन्द्रा विलम्बिता चैव तत्र काकुर्विधीयते ॥ १२६॥

यानि स्युस्तीक्ष्णरूक्षाणि दीप्ता चोच्चा च तेष्वपि ।
एवं नानाश्रयोपेतं पाठ्यं योज्यं प्रयोक्तृभिः ॥ १२७॥

हास्यश‍ृङ्गारकरुणेष्विष्टा काकुर्विलम्बिता ।
वीररौद्राद्भुतेषूच्चा दीप्ता वापि प्रशस्यते ॥ १२८॥

भयानके सबीभत्से द्रुता नीचा च कीर्तिता ।
एवं भावरसोपेता काकुः कार्या प्रयोक्तृभिः ॥ १२९॥

अथाङ्गानि षट् - विच्छेदोऽर्पण विसर्गोऽनुबन्धो दीपनं प्रशमनमिति । तत्र विच्छेदो नाम विरामकृतः । अर्पणं नाम लीलायमानमधुरवल्गुना स्वरेण पूरयतेव रङ्गं यत्पठ्यते तदर्पणम् । विसर्गो नाम वाक्यन्यासः । अनुबन्धो नाम पदान्तरेष्वपि विच्छेदः, अनुच्छ्वसनं वा । दीपनं नाम त्रिस्थानशोभि वर्धमानस्वरं चेति । प्रशमनं नाम तारगतानां स्वराणां प्रशाम्यतामवैस्वर्येणावतारणमिति । एषां च रसगतः प्रयोगः - तत्र हास्यश‍ृङ्गारयोराकांक्षायामर्पणविच्छेददीपनप्रशमनयुक्तं पाठ्यं कार्यम् । दीपनप्रशमनयुक्तं करुणे । विच्छेदप्रशमनदीपनानुबन्धबहुलं वीररौद्राद्भुतेषु विसर्गविच्छेदयुक्तं बीभत्सभयानकयोरिति । सर्वेषामप्येषां मन्द्रमध्यतारकृतः प्रयोगस्त्रिस्थानगतः । तत्र दूरस्थाभाषणे तारं शिरसा, नातिदूरे मध्यं कण्ठेन, पार्श्वतो मन्द्रमुरसा प्रयोजयेत्पाठ्यमिति । मन्द्रात्तारं न गच्छेत्, ताराद्वा मन्द्रमिति ॥ १३०॥

एषां च द्रुतमध्यविलम्बितास्त्रयो लया रसेषूपपाद्याः । तत्र हास्यशृङ्गारयोर्मध्यलयः, करुणे विलम्बितो, वीररौद्राद्भुतबीभत्सभयानकेषु द्रुत इति ।

अथ विरामः अर्थसमाप्तौ कार्यवशान्न छन्दोवशात् । कस्मात्, दृश्यन्ते ह्येकद्वित्रिचतुरक्षरा विरामाः । यथा -
किं ! गच्छ, मा विश सुदुर्जन ! वारितोऽऽसि
कार्यं त्वया न मम सर्वजनोपयुक्तम् ।
सूचासु चाङ्कुरगते च तथोपचारे -
ष्वल्पाक्षराणि हि पदानि भवन्ति काव्ये ॥ १३२॥

एवं विरामे प्रयत्नोऽनुष्ठेयः । कस्मात्, विरामो ह्यर्थानुदर्शकः सः ।
अत्र श्लोकौ -
विरामेषु प्रयत्नो हि नित्यं कार्यः प्रयोक्तृभिः ।
कस्मादभिनयो ह्यस्मिन्नर्थापेक्षी यतः स्मृतः ॥ १३३॥

यत्र व्यग्रावुभौ हस्तौ तत्र दृष्टिसमन्वितः ।
वाचिकाभिनयः कार्यो विरामैरर्थदर्शकैः ॥ १३४॥

प्रायो वीरे च रौद्रे च करौ प्रहरणाकुलौ ।
बीभत्से कुत्सितत्वाच्च भवतः कुञ्चितौ करौ ॥ १३५॥

हास्ये चोद्देशमात्रेण करुणे च प्रलम्बितौ ।
अद्भुते विस्मयात्स्तब्धौ भयाच्चैव भयानके ॥ १३६॥

एवमादिषु चान्येषु प्रविचारेऽपि हस्तयोः ।
अलङ्कारविरामाभ्यां साध्यते ह्यर्थनिश्चयः ॥ १३७॥

ये विरामाः स्मृता वृत्ते तेष्वलङ्कार इष्यते ।
समाप्तेऽर्थे पदे वापि तथा प्राणवशेन वा ॥ १३८॥

पदवर्णसमासे च द्रुते बह्वर्थसङ्कटे ।
कार्यो विरामः पादान्ते तथा प्राणवशेन वा ॥ १३९॥

शेषमर्थवशेनैव विरामं सम्प्रयोजयेत् ।
अत्र च भावगतानि च कृष्याक्षराणि बोद्धव्यानि, तद्यथा -
आकारैकारसंयुक्तमैकारौकारसंयुतम् ।
व्यञ्जनं यद्भवेद्दीर्घं कृष्यं तत्तु विधीयते ॥ १४०॥

विषादे च वितर्के च प्रश्नेऽथामर्ष एव च ।
कलाकालप्रमाणेन पाठ्यं कार्यं प्रयोक्तृभिः ॥ १४१॥

शेषाणामर्थयोगेन विरामे विरमेदिह ।
एकद्वित्रिचतुःपञ्चषट्कलं च विलम्बितम् ॥ १४२॥

विलम्बिते विरामे हि सदा गुर्वक्षरं भवेत् ।
षण्णां कलानां परतो विलम्बो च विधीयते ॥ १४३॥

अथवा कारणोपेतं प्रयोगं कार्यमेव च ।
समीक्ष्य वृत्ते कर्तव्यो विरामो रसभावतः ॥ १४४॥

ये विरामाः स्मृताः पाठ्ये वृत्तपादसमुद्भवाः ।
उत्क्रम्यापि क्रमं तज्ज्ञैः कार्यास्तेऽर्थवशानुगाः ॥ १४५॥

नापशब्दं पठेत्तज्ज्ञो भिन्नवृत्तं तथैव हि ।
विश्रमेन्नाविरामेषु दैन्ये काकुं न दीपयेत् ॥ १४६॥

वर्जितं काव्यदोषैस्तु लक्षणाढ्यं गुणान्वितम् ।
स्वरालङ्कारसंयुक्तं पठेत्पाठ्यं यथाविधि ॥ १४७॥

अलङ्कारा विरामाश्च ये पाठ्ये संस्कृते स्मृताः ।
त एव सर्वे कर्तव्या स्त्रीणां पाठ्ये त्वसंस्कृते ॥ १४८॥

एवमेतत्स्वरकृतं कलाताललयान्वितम् ।
दशरूपविधाने तु पाठ्यं योज्यं प्रयोक्तृभिः ॥ १४९॥

उक्तं काकुविधानं तु यथावदनुपूर्वशः ।
अत ऊर्ध्वं प्रवक्ष्यामि दशरूपविकल्पनम् ॥ १५०॥

॥ इति भरतीये नाट्यशास्त्रे वागभिनये काकुस्वरव्यञ्जनो नाम
सप्तदशोऽध्यायः ॥

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

---

.. Natya Shastra Chapter 17 ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*